पत्र
22 - ७८

नं. २२ घ
सिद्धांतचन्द्रिका
सारस्वतटीका
७८ पत्र

© Dharmartha Trust J&K. Digitized by eGangotri

सिद्धांतचन्द्रिका सारस्वतटीका

२ ~~पूर्वार्ध उत्तरार्ध~~

५५
२३
७८

७८ पत्राणि

© Dharmartha Trust J&K. Digitized by eGangotri

सा चं १

ॐ श्रीगणेशाय नमः ॐ नमः सरस्वत्यै ॐ नमस्कृत्य महेशानं मतं तद्ब्रह्मपतेर्जलेः वागीशगी
र्णसूत्राणां कुर्वे सिद्धांतचंद्रिकाम् ॐ श्रीगुरवे नमः अइउऋऌसमानाः अनेन क्रमेणैते व
र्णा ज्ञेयाः नेच समानसंज्ञाः स्युः नैतेषु मध्येषु संधिरनुसंधेयो विवक्षितत्वात् विवक्षितस्त्वसंधिर्भ
वतीति नियमात् ह्रस्वदीर्घप्लुतभेदाः सवर्णाः एतेषां ह्रस्वदीर्घप्लुतभेदाः सजातीयाः परस्परं
सवर्णा भण्यंते अल्पवर्णाश्च एकमात्रो ह्रस्वः द्विमात्रो दीर्घः त्रिमात्रः प्लुतः व्यंजनं चार्धमात्र
कम् एऐओऔ संध्यक्षराणि उभये स्वराः अकारादय एकारादयश्च ह्रस्वदीर्घप्लुतभेदाः स्वरा
उच्यंते अवर्णो नामिनः अवर्णवर्जाः स्वरा नामिन उच्यंते हयवरल ञमङणनम् झढधघभज
डदगब खफछठ चटतकप शषस आद्यंताभ्याम् आद्यंतौ वर्णौ मध्यगानामाद्यंतौ सहिता
नां संज्ञाः स्युः अच झभ जबगड एवमन्येपि कार्याः येन कार्ये विधातव्ये उच्चार्यमाणो वर्णो इ
त्संज्ञको भवति यस्येत्संज्ञा तस्य लोपः प्रसक्तादर्शनं लोपः वर्णविच्छेदो लोपः अश् प्रत्याहारशो
नेत्वक् स्वरानंतरा हसाः संयोगः अकुहविसर्गाः उकारोत्र पंचवर्णपरिग्रहार्थः अदेङ्गुना
मिनो गुणाः अत्र योगे एते गुणसंज्ञकास्तेच नामिनः स्थाने भवंति आरैऔवृद्धिः यत्रायोगे एते
वृद्धिसंज्ञकाः अंत्यस्वरादिष्टिः अंत्योपः स्वरस्तदादिवर्णो टिसंज्ञको भवति अंत्यात्पूर्व उपधा
अंत्याद्वर्णात्पूर्वो यो वर्णः स उपधासंज्ञको भवति ह्रस्वो लघुः विसर्गानुस्वारसंयोगपरो

© Dharmartha Trust J&K. Digitized by eGangotri

गुरुः दीर्घश्च मुखनासिकावचनोऽनुनासिकः विभक्त्यन्तं पदम् नपरः स्वसमानकालस्य वर्णस्य सं
ज्ञा इति संज्ञाप्रकरणम् श्रीगणेशायनमः इ यं स्वरे इवर्णो यत्वमापद्यते स्वरे परे हसे हसः
स्वरात्परो रेफहकारवर्जितो हसो हसे परे स्वस्थाने वा द्विर्भवति क्रमेणवाः क्रमानां क्रमेणवेन
वा भवति वर्ग्यो वर्ग्येण सवर्णाः स्वरहीनं परेण संयोज्यम् प्रसिद्धं द्वित्वं गमनं तेन दध्यत्र ज
वायवलो वा द्विर्वाच्यः दध्यत्र दध्य्यत्र दध्यत्र द्ध्यत्र हः स्वरपूर्वो रेफात् हकारात् परो
यो वा द्विर्भवति गौर्य्यत्र गौर्यत्र नह्य्यस्ति नह्यस्ति अवस्थितविभाषया यस्य यस्य प्राप्ति द्वित्वम्
पाणिनीयमतानुसारि उवम् स्वरे मध्वत्र मध्व्वत्र मद्ध्वत्र मधत्र स्वरे वर्ष्टं पदे सत्रोनवादनुवर्तनीयम्
ऋरम् स्वरे पित्रर्थः लृलम् स्वरे लृवंधः एअय् स्वरे नयनम् ओअव् स्वरे भवनम् गोरवापदांते
स्वरे इति किमर्थं यत्वावेक्षार्थो गवाग्रम् गोग्रम् गोऽग्रम् ईदूतौ यो च ईदूतयोः पदयोर्गौर
निंत्यम् गवेंद्रः गवाक्षः ऐआय् स्वरे नायकः औआव् स्वरे पावकः क्वचित्स्वरे यकारः गव्यू
तिः क्रोशद्वयम् अयत्र गोपूतिः तथ्यं नयं शाकार्थे अम्यत्वे पापमनेयमनः ऋत्यलंकृत्ये
कथायेंप्रसारितं कथ्यम् केयमन्यत् अत्वादेवं हिताणवाववकव्यः अतो द्विर्णोसेना औढः यौ
ढिः स्वैरम् स्वैरी स्वैरिणी धोलोपश्चापदांते पदांते स्थितानां मयादीनां यकारवकारयोर्लोप
श्चावाभवति नद्यागताः नद्यागताः पटइह पटविह तस्माइदम् तस्मायिदम् ताइह ताविह लो

सा वं २
2

पशिश्वनर्वे संधिः लोपेनभवति व्यादेरितिनिर्देशात् हामोदरः एनाश्वः पशोर्नेत्वः पशोर्नेष्यितादेका
रादेकाराश्च परस्याकारस्य लोपो भवति नेच्छपदोच गोवो गोश्वजिनम् गवाजिनम् गोजिनम्
सवर्णे दीर्घः सह समानस्य सवर्णे परे सह दीर्घो भवति श्रद्धाच दैत्यारिः इयीद्र श्रीशः भानूदयः
होतृकारः ऋति सवर्णे ऋवा होतृकारः होतृकारः ऌति सवर्णे ऌवा होतॢकारः होतृकारः
सामान्यशास्त्रतो नूनं विशेषो बलवान्भवेत् परेण पूर्वबाधो वा प्रायशो दृश्यतामिह हलादेशेषा
देटलोपो वक्तव्यः हलीषा लांगलीषा मनीषा श्रयोम् शकंधुः कर्कंधुः कुलटा पतिरिति सारंगः प
शुपतिरणोः सारंगोन्यः सीमंतः केशविन्यासे सीमान्तोन्यः ओत्वोष्ठयोः समासे वा स्थूलोतुः ओ
ओष्ठ अवर्णे ओकारे ओकारे च परे सह ओकारो भवति स्थूलोतुः बिम्बोष्ठः बिंबौष्ठः समासे किम्
तवोष्ठः पदे रादौ धातो अवर्णान्तोपसर्गस्य लोपः प्रेजति उपोजति पदे रादौ नाम धातौ वा उपो
उकीयति उपौकीयति प्रोचीयति प्रौचीयति एवमोत्वमोर्न उपैति उपैधते प्रस्यैष्यैष्योन्न प्रेषः
प्रेष्यः प्रस्य किम् प्रेषः एवेनव यावता श्रयेव श्रवधारणे तु श्रयेव अइए अवर्णे इवर्णे परे सह
एकारो भवति ममेदम् उओ अवर्णे उवर्णे परे सह ओकारो भवति गंगोदकम् एऐऐ अवर्णे एका
रे ऐकारे च परे सह ऐकारो भवति तवैषा तवैश्वर्यम् ऋअर् अवर्णे ऋवर्णे परे सह अर्भवति हसाम
स्यनमस्य लोपो वा सवर्णे ऋसे तवर्द्धिः तवर्धिः तवर्द्धुः अवर्णो नाउपसर्गोरकारादौ धातौ वार् २

© Dharmartha Trust J&K. Digitized by eGangotri

उपार्छति प्रार्छति अवर्णो ऽत्र्लेयपदे तृतीयासमासे ऋत्वोतः शीतार्तः तृतीयासमासे किम् परम
र्तः अवत्सतरकम्बलवसनार्णोदशानामृणे प्रार्णम् वत्सतरार्णम् कम्बलार्णम् वसनार्णम्
दशार्णम् ऋणार्णम् ऋदादौ नामधातौ वा प्रार्षभीयति प्रर्षभीयति लृ अल् अवर्णो लवर्णोप
रे सह अल् भवति तवल्कारः तवल्कारः तवल्कारः तवल्कारः लृदादौ नामधातौ वा ल् प्राल्का
रीयति अवर्णाद्यचोर्द्विवा प्राल्कारीयति प्रल्कारीयति प्राल्कारीयति इति स्वरसंधिः २ नामी
अस्वरो नामी शब्दः संधिं न याति अमी अश्वाः अमी आदित्याः द्विवचने ईकारान्त ऊकारान्त एकारान्तं यद्द्विवचने
वर्तमानः संधिं न याति अग्नी अत्र पटू अत्र माले अत्र पचेते इमौ ओ निपातः स्वरे निपातः संधिं न
याति अ अपेहि इ इन्द्रं पश्य उ उत्तिष्ठ आ एवं मन्यसे ओदन्तो निपातश्च अहो ईशाः आहो आचार्याः
ओदन्तो यथा विनो विष्णो इति विष्णविति ऋणाम असवर्णे वा समासे परान्ते वा ह्रस्वः वक्रि अत्र व
क्र्यत्र वक्री अत्र मधु पत्तन मधुपत्तन कर्तृ इदम् कर्त्रिदम् परान्ते किम् गौर्य्यौ ह्रस्वविधानसा
मर्थ्याद्वसंधिः समासे तु ह्रस्वश्च परान्तानां समानानां ऋति लृति वा ह्रस्वः ब्रह्मऋषिः ब्रह्म
र्षिः देवऋषिः देवर्षिः तवऋकारः तवर्कारः होतृऋकारः होत्रकारः होतृकारः परान्ता
नां किम् प्रार्छति नपाउ ओर्वे वा स्वरे किम् उ उक्तम् किमु उक्तम् इतादात्कालनेदेः प्लुतः इतान्त
रोपनेयदाकांतस्पष्टे वा प्लुतः प्लुतः संधिं न याति परिदेवदत्त आगच्छ परिदेवदत्त २ अत्र न्वसि

© Dharmartha Trust J&K. Digitized by eGangotri

सा
व्रं
२
3

हेहेशयोगे हेह्रयोः स्थानेवा हेस्वमहापन्न हेहेश ह्रयीश ममम्यंयेरं नेसंयच्छाति वातश्मीश्रा
त्रो पर्यीड्दम पर्योपध्रः इत्योवाचः उड्तिविति स्रस्तनवदितो देवदत्तेति शुरोव्रजतो नेमस्याधि
वापर्यायेणस्नतः दे२ वदत्त देवद२त्त देवदत्त२ शुरोः किम् वकाराद्दकारस्य माभूत् प्रत्नतः कि
मल्लस्मः इतिप्रकृतिभावः २ चपाश्रवेनवाः परांतेवर्तमानाश्रपाजवा भवंति श्रवे परे षड्य्त्र गप्पा॰
लाम षडम वाड्मयरा वाग्मयरा जमेजमावा परांतेवर्तमानाश्रपाजमेजमावा भवंति प्रल
येजमेनिलंजवस्यापि तन्मयम् चिन्मयम् चपाश्रुः शः चपादुत्तरस्य शकारस्य छकारो वा भवति
श्रवे परे वाकक्षूरः वाकक्षूरः श्रवे किम् वाकश्लोतिति होकभाः चपादुत्तरस्य हकारस्य कभावा
भवंति षड्वर्गगाश्रपदूद्दरपश्नतर्यो भवति तद्धविः तद्धविः वाग्घविः वाग्हविः अज्झारः अच्हारः
अजलो अज्हलो षड्लानि षड्हलानि स्तोश्चुभिश्चुः स्तोस्सकारतवर्गयोः शकारचवर्गा
भ्यां योगे शकारचवर्गौ भवतः संख्यैसाम्यं यथाक्रममिति वाच्यम् कश्चरति कश्चूरः तच्छिवम्
तच्छादयति तश्चात् शकारादुत्तरस्य तवर्गस्य चुत्वं न भवति प्रश्नः विश्नः ष्टुभिष्टुः सकारतवर्ग
योः षकारटवर्गाभ्यां योगे षकारटवर्गौ भवतः कष्टष्टः तट्टीकते नषि षकारे परे तवर्गस्य
टुत्वं न भवति भवान्षष्टः तोरंत्यात्परांते परांतात्टवर्गात्परस्य स्तोः ष्टुत्वं न भवति षाल्तवः षन्न
ः षट्सीदति तवर्गात्तवर्गाचावत पसवति पसगार्यः सुपिन लिट्स लिट्त्व तेलिलः तवर्गस्य २

लकारेपरेलकारोभवति तल्लुनाति भवांल्लिखति सानुनासिकाननुनासिकत्वेनयवलाद्वि
धा नस्यनकारस्यानुनासिकोलकारः उदः स्थास्तंभोः सलोपः उत्थानम् उत्तंभनम् नःसक्का
ते नोंतस्यपदस्याचपरेछतेसगमोभवति राजंश्छिशम् भवान्तनोतिभवांस्तनोति चवेप
रेकिम् सन्त्सरुः नप्रशानः प्रशांतनोति शेचवा नोंतस्यपदस्यशेपरेवाचगमोभवति
भवाञ्छूरः भवा[illegible]रः भवाञ्शूरः भवानशूरः ङ्णोह्रस्वाद्विःस्वरे ङकारणकारनकाराह्रस्वा
दुत्तराद्विर्भवंतिस्वरेपरेपदांते प्रत्यङ्ङिदम् सुगण्णिह राजन्निह छः ह्रस्वात्परस्यछकारोद्विर्भवति
खसेचपाझसानाम् झसानांखसेपरेचपाभवंति तवच्छत्रम् टीचोत् स्रोच्छति पदांताद्वा दी
र्घात्पदांताद्वा लक्ष्मीच्छाया लक्ष्मीछाया आङ्माङ्भ्यांनित्यम् आच्छादयति माच्छिदत् ङंसोवापरे
त्वेसंयोगांतस्यलोपोन ङंस्कोकिलः ङंस्चैत्रः चवपरेकिम् ङंत्तीरम् त्वेपरेकिम् ङंदासः व्या
पान्तोवा ङंसत्थानम् ङंत्थानम् मोनुस्वारः मकारस्यानुस्वारोभवतिहसेपरेपदांते तंहसति
पदेव्यया नश्चापदांतेझसे नस्यमस्यवापदांतेवर्तमानस्यानुस्वारोभवतिझसेपरेहकारेवय
शांसिपुंसुत्वनह्वांहि यमायपेस्य अनुस्वारस्ययमाभवंतियपेपरेयस्यपरस्यसवर्णः शांतः यङ्
किंतः संवितः कर्दितः वा पदांतेपदांते वर्तमानस्यानुस्वारस्ययमावाभवंति अनुस्वारस्यसव
र्णः त्वंकरोषित्वङ्करोषितंतनोति तन्तनोति संयंता संयन्ता संवत्सरः संवत्सरः यंलोकम्

© Dharmartha Trust J&K. Digitized by eGangotri

सा॰
वं॰
५
4

यल्लोकम् किंवं तेराजन्तोपदेशे मेमकारस्य मएवस्यात् सम्राट् यवलमनपरेहकारे मस्य यवल
मनावा किंय्ह्यः किंह्यः किंव्ह्वलयति किंह्वलयति किंल्ह्लादयति किंह्लादयति किम्ह्मलय
ति किंह्मलयति किन्ह्नुते किंह्नुते शसे चपस्य द्वितीयो वा वत्सरः वथ्सरः अफ्सराः अप्सराः न
परेते नत्सोधः ङकटुकत्वमिनस्य विभक्तौ न भवन्ति टनात्सस्य वा धुट् षट्सन्तः षट्त्सन्तः सन्त्सः
सन्सः शसे ङणोः कुकटुकौ वा प्राङ्क्षष्ठः प्राङ्षष्ठः प्राङ्क्षष्ठः सुगण्षष्ठः सुगण्ट्षष्ठः सुगण्ट
षष्ठः पकारे परे नन्तु नकारस्य वा सो विसर्गः सकाररेफयोर्विसर्जनीयादेशो भवति यथा तो
रसे परे ते च ङपोः ङ्कपौ वा कवर्गपवर्गसंबन्धिनि खे परे विसर्जनीयस्य ङ्कपौ वा भवतः
नृः पाहि नृपाहि नॄन्पाहि इतिहासमंधोपिः विसर्जनीयस्य सः खसे परे कस्तनोति शसपरे खसे
विसर्जनीयस्य विसर्ग एव कः त्सरुः कः प्सातावनात्वनः लोभगाः शसे वा क्लोः श्रुभिः श्रुः क
पशरः कश्छष्टः कः स्फुरः कः षष्ठः कः साधुः कस्साधुः खे परे शसे विसर्गलोपो वा हरिस्फुर
ति हरिः स्फुरति हरिस्फुरति ङपोः कपौ वा कः करोति कः पचति वाचस्पत्यादयो निपात्यन्ते
वाचस्पतिः बृहस्पतिः तस्करः कौतस्कुतः कानस्कान कास्कान् भास्करः पयस्पात्रम् यशस्क
ल्पम् यशस्कम् यशस्काम्यति सर्पिष्पाशम् सर्पिष्कल्पम् सर्पिष्कम् सर्पिष्काम्यति नमस्करोति
निष्पतद्धम् आविष्कृतम् तिरस्कर्ता द्विष्करोति द्विः करोति एवं त्रिष्करोति चतुष्करोति चतुष्क

© Dharmartha Trust J&K. Digitized by eGangotri

पालमसर्पिष्करोतिसर्पिःकरोति पयुष्करोतिपयुःकरोति सर्पिष्कुंडिकासर्पिःकुंडिका अ
यस्कारः अयस्कुंभः अयस्पात्रमयस्पात्रम् अयस्सहितानाकशा अयसकशा अयस्कर्णी अयस्पदम् शिर
स्पदम् अकृतिगणोऽयम् रोराविद्धुअ्को विसर्गस्यपरोतेरोभवतिनतत्रण्यादिषु अहर्गणः अ
ऽरादिषुवन्नअहोरात्रम् अहोरथंतरम् परोतेअहोभ्याम् एतेोभ्यः अकारान्तरस्यविसर्गस्यौकारो
भवति अतिपरतः कोऽर्थः हवे अकारान्तरस्यविसर्गस्यौकारोभवतिहवेपरे देवोयाति मनोर
थः "आदवेलोपश्च" अवर्णान्तरस्यविसर्गस्यलोपश्चभवति अवेपरे देवाः अत्रदेवा अत्र वाताः
वांतिवातावांति देवाइह स्वरेयत्वंवा देवायिह भोसः भोस्भगोसअघोसइत्येतेषांविसर्गस्य
लोपश्चभवत्यवेपरे भोइह भगोनमस्ते अघोयाहि स्वरेयत्वंवा भोयिह भोयेहि भगोइह भगोयि
अवोअपगत्नु अवोयपगत्तु ह नामिनोरः नामिनः परस्यविसर्गस्यरेफोभवत्यवेपरे अग्निरत्र पटुर्वक्ता विसर्गस्यरेफप्रकृति
कस्यत्वयेवारेफः गीर्पतिः गीःपतिः गीर्ँपतिः धूर्पतिः धूर्ँपतिः धूःपतिः अहरादीनांपत्या
दिषुवारेफः अहर्पतिः अहःपतिः अहर्ँपतिः रः रेफप्रकृतिकस्यविसर्गस्यरेफोभवत्यवेप
रे प्रातरत्र अंतर्गतः रिलोपोदीर्घश्च रेफस्यरेफेपरेलोपोभवतिपूर्वस्यचदीर्घः पुनारमते हरी
राजते भानूरम्यः सैषाद्धहसे सएषाभ्यामेषशब्दाभ्यांपरस्यविसर्गस्यलोपोभवतिहसेपरेअकारो कृ^
त्तनञ्समासात् सचरति एषचरति अकारांतेनेतिकिं एषकोहरः अनञ्समासेतिकिं असःशिवः
कृ

© Dharmartha Trust J&K. Digitized by eGangotri

सा
वं
विभक्त्यन्तप्रक्रियान्तं
5

मध्याह्नादिविसर्गस्य लोपः स्वरे लोपएव पादः पूरणे स्यात् सैषदाशरथी रामः सैषराजा युधिष्ठिरः सै
षकर्णो महात्यागी सैषभीमो महाबलः इति विसर्गसंधिः इति संधिपंचकम् श्रीगणेशा
यनमः अथ विभक्तिनाम विभक्तिरहितं धातुवर्जितं चार्थवत् शब्दरूपं नाम उच्यते तस्मात् सिऔ
जस् अम् औट् शस् टाभ्यांभिस् ङे भ्यां भ्यस् ङसि भ्यां भ्यस् ङस् ओस् आम् ङि ओस् सुप् तस्मान्नाम्नः
परतः स्यादयः सप्त विभक्तयो भवंति एकत्वद्वित्वबहुत्वेषु एकवचनद्विवचनबहुवचनानि स्यो
र्विसर्गः देवः देवौ जसो जकारो जसीति विशेषणार्थः देवाः अम्शसोरस्य समानात्परयोरम्श
सोरकारस्य लोपो भवत्यधातोः देवम् देवौ शसः सकारः शसीति विशेषणार्थः सोनः पुंसः
पुंलिंगात्समानात्परस्य शसः सकारस्य नकारादेशो भवति नत्वाम्यासीम्यात्वम् शसि शा
सिपरे पूर्वस्य दीर्घो भवति यदादेशस्तद्वद्भवति नत्वं वर्णमात्रविधौ देवान् टाटकारः टेनेति
विशेषणार्थः टेन अकारात्परस्य टा इन भवति देवेन भ्यामि अकारस्यात्वं भवति भकारादौ परे देवा
भ्याम् भिस् अकारात्परस्य भिसो भकारस्याकारो भवति अइए एऐऐ देवैः ङकारो ङित्कार्या
र्थः ङेयक् अकारात्परस्य ङेर्यकारादेशो भवति देवाय देवाभ्याम् एस्मिन् बहुत्वे अकार
स्यैत्वं भवति सकारभकारादौ परे बहुत्वे सति देवेभ्यः ङसिरत् अकारात्परो ङसिरद्भवति दे
वात् देवाभ्याम् देवेभ्यः ङस्स्य अकारात्परो ङस्स्यो भवति देवस्य ओसि अकारस्यैत्वं भवति

© Dharmartha Trust J&K. Digitized by eGangotri

ओमिपरे देवयोः नुडागमः समानात्परस्यामो नुडागमो भवति ॥ ङसिनत्हृस्वादेव नामि नामिपरे
पूर्वस्य दीर्घो भवति देवानाम् देवे देवयोः किलात्मः सः कृतस्य कवर्गादिलाक्षणपरस्य केन
विनत्स्त्वेण कृतस्य सकारस्य षकारादेशो भवति ॥ शेतोस्थितस्य न भवति देवेषु सिर्णिः स्नामेञ्जणो
सिर्विसेत्तो भवति समानाद्धेलोपो धातोः हृस्वात्समानादेदोतोर्धेः नरस्य पेलोपो भवति यथा
तोः सभिसृत्योभिव्यक्तयेदेशाह्वस्य शाकश्योगः हे देव हे देवौ हे देवाः पञ्चेन्द्रपदनाममकेदक
स्मादयः सर्वविश्वउभउभयअन्यअन्यतर इतरडतमडतरडतमसमसिमत्वनत्वभवतनेमपकपर
अवरदक्षिणउत्तरअपरअधरस्वअन्तरत्यद्तद्यद्एतद् इदमदस्द्विकिम् युष्मद् अस्मद्
एते सर्वादयस्त्रिलिंगाः जसी सर्वादेरकारान्तात्परो जस् ई भवति सर्वे ॥ ष्टुनोणोनेन षकारादेः
कृत्स्नवर्णेभ्यः परस्य नकारस्य ष्टुपरस्य णकारो भवति ॥ शेतोस्थितस्य न भवति सर्वानि स्मा
दे ॥ स्वकृत्वनेपि स्वयम्भाहादेण कवर्गेण पवर्गेण नस्वादेण विसर्गेणः कपाभ्यां वमध्येव
व्यानेपि भवति नामेन सर्वेण सर्वादेः स्मट् सर्वादेरकारान्तात्परस्य ङेः स्मैनस्य स्मडागमो भव
ति सर्वस्मै ॥ ङतः सर्वादेरकारान्तात्परस्यात्ः स्मडागमो भवति सर्वस्मात् सडामः सर्वादेरवर्णान्ता
त्परस्यामः सडागमो भवति सर्वेषाम् ङिस्मिन् सर्वादेरकारान्तात्परो ङिः स्मिन् भवति सर्वस्मिन्
सर्वयोः सर्वेषु हे सर्व एवं विश्वादयोप्येकशब्दान्ताः उभशब्दस्तु नमोऽन्यशब्दोतनसवंदेनाग्रासाः प्र

© Dharmartha Trust J&K. Digitized by eGangotri

सा
९

वीदीनांनवानांजसस्मैस्मिहिईस्मात्स्मिनौवा पूर्वेपूर्वाः पूर्वस्मात्पूर्वात्पूर्वस्मिन्पूर्वे एवंपरादय :
शेषंसर्ववत् सर्वादिः सर्वकार्यीस्यात्त्रेवेद्योगोग्यवाभिधा पूर्वादिस्वव्यवस्थायांसमानत्यांनरोग
ति परिधानेवहिर्योगेस्वद्योतात्यन्यवाच्यपि सर्वमतिक्रांतोतिसर्वः तस्मैअतिसर्वायदेहिप्रियंस
र्वयस्यासोप्रियसर्वः तस्मैप्रियसर्वाय सर्वोनामकश्चित्तस्मैसर्वाय अतिसर्वायसमायत्त्यायश्च
नतायांषण्टि श्वेतदेश्वेनतावाशाटकाः परिधानीयास्त्यर्थः श्वेतदेश्वेतवर्वाचेइलशृहावाचास्त्यर्थः ग्रा
मयोर्यतदेतापसः मध्येइत्यर्थः स्वायधनायज्ञातयेवा द्वंद्वेसर्वादीनांनसर्वकार्यमपूर्वेपरावराणाम्
वात्तसि वर्णाश्रमेतरे वर्णाश्रमेतराः तृतीयासमासेतृतीयासमासार्थेवाक्यचन मासपूर्वायमासे
नपूर्वाय प्रथमचरमतयऽल्पार्धकतिपयनेमानांजसिवा प्रथमेप्रथमाः चरमेचरमाः तयडयटो
प्रत्ययोनतस्तदंताग्राह्याः द्वितयेद्वितयाः द्वयेद्वयाः शेषंदेववत् नेमेनेमाः शेषंसर्ववत् तीयस्यवाङि
त्सुसर्वेशाद्धवद्रूपत्रेयम् द्वितीयस्मैद्वितीयायद्वितीयस्मात्द्वितीयात्द्वितीयस्मिन्द्वितीये एवंतृती
यः उभशब्दोनित्यंद्विवचनांतः उभौ२ उभाभ्यां२ उभयोः२ उभयशब्दस्यद्विवचनेनास्तीत्येकेप्रस्ती
त्यन्ये उभयः उभयौ उभये उभयम् उभयौ उभयान् निर्जरः जरायाजरावास्वरादौवा षष्ठीनिर्दिष्टस्या
देशास्तदंतस्यतेयः गृहस्थिश्चसर्वस्य निर्दिश्यमानस्यादेशाभवंति एकदेशविकृतमनन्यवत् नि
र्जरसौनिर्जरौनिर्जरसः निर्जराः एवंहसादौचदेववत् संख्याविसायपूर्वस्याह्नस्याहन्वाङौ वेस्योः १

अन्नन्तस्योपधाया वा लोपो भवति ईङ्योः परयोः वकारमकारान्तसंयोगादन्नन्तस्य न यज्वनि
इति यज्ञे विगतमहः व्यह्नः व्यह्नि व्यहनि व्यह्ने सामानि साम्नि सामनि साम्ने पादः दन्त नासिका
मास हृदय निशा असृज् यूषन् दोष् यकृत् शकृत् उदक आसन् इत्येतेषां स्थाने पत् दत् नस् मास् हृत् निश् असन् यूषन् दोषन्
यकन् शकन् उदन् आसन् शसादौ वा पदः पदा पद्भ्याम् पद्भिः दतः दता दद्भ्याम् दद्भिः मासः मासा मा
भ्यां माभिः अल्लोपः स्वरेऽम्वृशकारात् शसादौ अन्नन्तस्योपधाया लोपो भवति शसादौ स्वरे परे वकारम
कारान्तसंयोगादन्नन्तस्य न ब्रह्मणः ब्रह्मणा नाम्नो नलोपो धौ नाम्नो नकारस्य लोपो भवति धौ सप
रे नेत्यर्थः ब्रह्मभ्यां ब्रह्मभ्याम् एते पञ्च सर्ववत् पदादयः शसादावस्ये के सोमपाः सोमपौ सो
मपाः सोमपाम् सोमपा भ्यामित्यादि एवं कीलालपाः शंखध्मा ... धातोः कि
म् हाहान् हाहा हाहै हाहः हाहोः हाहाम् हाहे हाहासु हे हाहाः हरिः औङ इकारान्तादुकारान्ताच्च
परः औङ् आपद्यते हरी एङ्गन्तसि इकारान्तस्योकारान्तस्य च ... परे एकार ओकारश्च भवति हरयः
धौ इकारान्तस्योकारान्तस्य च धौ परे एकार ओकारश्च भवति हे हरे हे हरी हरिम् हरी हरीन् टाना
स्त्रियाम् इकारान्तादुकारान्ताच्च परष्टा ना भवति न तु स्त्रियाम् हरिणा हरिभ्याम् हरिभिः ङिति इका
रान्तस्योकारान्तस्य च ङिति परे एकार ओकारश्च भवति हरये हरिभ्याम् हरिभ्यः इस्य परो ...
... अकारस्य लोपो भवति हरेः २ हर्योः हरीणां ... इदुद्भ्याम् ... भवति स

दौ

आतोधातोर्लोपः धातुस
म्बन्धिन आकारस्य लोपो
भवति शसादौ स्वरेप
रे सोमपः सोमपाः

© Dharmartha Trust J&K. Digitized by eGangotri

सा. वे ८ 7

वह्नित् ङितिदेः ङितिपरेदेर्लोपो भवति हर्यै हर्योः हरिषु एवमग्निगिरिरविकलिध्वनिपतिमन्या
दयः उकारान्ता विष्णुवायुभानुगुरुवादयो ऽप्येवं ज्ञेयाः भानुः भानू भानवः हे भानो सेर्ज्ञेयेः सखि
शब्दान्तरेतास्य परस्य सेर्डो भवति सखा पेसख्युः सखिशब्दस्यान्तस्याप्यैकारादेशो भवति
पिबनितेषु एवम् सखायौ सखायः सखायं सखायौ सखीन् सखिपत्योरीक् सखिपतिश
ब्दयोरीगागमो भवति टाङेङिषु परतः रीचेत्वाद्यानभवति सख्या सख्ये सख्युः सखिपतिशब्दयो
सेगागमो भवति ङसिङसोरकारे परे ततो ऽतः सकारान्तात्परस्य ङसिङसोरकारस्योकारो भव
ति सवडित ङितिदेः सख्युः सखिभ्यां सखिभ्यः सख्युः सख्योः सखीनाम् ङेरौ ङिदितो ऽत्वं कृते
सखिपत्योरीगागमः सख्यौ सखिषु प्रोभनः सखायस्स सखायस्य सखिना प्रतिशायिनः सखा
प्रतिसखायव सखायस्य सपरम सखायपरम सखायौ परम सखिना सखीमतिक्रान्तः प्रति
सखिः गृहद्वापेरंग कोन लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणमिति न्यायात् पतिः
पत्यापत्येपत्युःपत्यो पतिः समासे हरिवत् भूपतये ग्रामपत्ये मतिरिव सखिना पतिना हि
शब्दो नित्यं द्विवचनान्तः त्यदादेष्टेरस्यादौ द्वौ २ द्वाभ्यां ३ द्वयोः २ संज्ञोपसर्जनयोरन्तत्वम् द्विना
मकस्मिन् द्विः द्वौ द्वयः द्वावति क्रान्तो निद्विः प्राधान्येन परमद्वौ त्रिशब्दो नित्यं बहुवचनान्तः त्रयः
त्रीन्त्रिभिः त्रिभ्यः २ त्रेस्त्रय् त्रिशब्दस्य त्रयादेशो भवति नामि परे त्रयाणां निपिवत् द्विशब्दस्यैव

© Dharmartha Trust J&K. Digitized by eGangotri

कन्यः रथानाम् एरमरथानाम् कनिष्ठो नित्यं बहुवचनान्तः उतेः उतयं तसंख्याघाः परयो
जेस्यासोलेक् ध्रुम्यघलोपेमन्यलतानाम् लाकितत्रिभिनम् कतिकतिकतिभिः कतिभ्यः
कतीनां कतिषु उडुलोमभिः उडुलोमभी लोम्नोपत्येष्ववहुषु कारः उडुलोमाः उडुलोमिम् उडु
डुलोमी उडुलेमान् वानप्रस्थीः वानप्रस्थ्यौ वानप्रस्थ्यः वानप्रस्थीम् वानप्रस्थ्यौ वानप्रस्थीन् वान
प्रस्थ्यावानप्रस्थीभ्याम् वानप्रस्थीभिः वानप्रस्थ्ये वानप्रस्थ्यः वानप्रस्थ्योः वानप्रस्थी वानप्रस्थीषु
एवं ग्रामणीप्रभृतयः क्विबन्तवानप्रस्थी शब्दस्य मिश्रासिद्धेव विशेषः वानप्रस्थम् वानप्रस्थ्यः
वानप्रस्थ्य घोवेतिपः वस्तः श्रेयस्योपस्यस्य वहुश्रेयसी वहुश्रीहौ ईयसः पस्य यान्तस्य नहस्वः
ईहरेनस्य इत्युवू स्यान भिन्नस्य स्वाख्यस्योपसर्जनत्वे पित्वी कार्यं वहुरूपम् हसेपः सेलोपः
हसेनादीवेनाम्यपरस्यसे लोपो भवति यो हस्वः इयुवू स्थानवर्जितयोरी हलोः स्त्रीशाहस्य
स्त्रियो यो एवे हस्वो भवति हस्वविधानसामर्थ्यादाविति नदेव बहुश्रेयसि वहुश्रेयसीम् वहुश्रे
यस्यौ वहुश्रेयसीन् हिनामट् स्त्रियामीकारान्तात् ऊकारान्तात् हिनामट् आगमो भवति वहुश्रे
यस्यै वहुश्रेयस्याः वहुश्रेयसीनाम् स्त्रियांघोः इवर्णान्तात् उवर्णान्तान् स्त्रियां ङेर्मानाम्पर
स्यादेशमादेशो भवति वहुश्रेयस्याम् घञीवन्तन्नाम सिलोपः अतिलक्ष्मीः देवतिलक्ष्मीः
शेषं वहुश्रेयसीवत् स्त्रियाः धोपान्तादिवुवौस्वरे धातोरीवर्णोवर्णयोरियुवौ भवतः स्या

© Dharmartha Trust J&K. Digitized by eGangotri

सा. वं. ८

४

दौ स्वरे परे सुश्रियौ सुश्रियः एवं सुधीयवक्र्यादयः सेनानीः ॥ सौ वा ॥ अनेकस्वरस्यनास्त्रो धातो
रिवर्णोवर्णयोर्यकारवकारौ भवतः स्यादौ स्वरे परे धातोरवयवः संयोगः पूर्वो यस्मात्तस्मा
त्तन्नसोमपदस्यानेकस्वरस्य चेदुपसर्गकारकपूर्वस्य वा नास्ति पूर्वस्य वर्षाकरटस्य न पूर्वं भूश
ह्यादन्यभूशब्दस्य सुधीशब्दस्य च न सेनान्यौ सेनान्यः सेनानीभ्याम् सेनानीभिः नियः नीशब्दा
दुत्तरस्य ङेराम् आदेशो भवति सेनान्याम् एवं सुनीप्रधीग्रामण्यादयः धातुनासंयोगविशेषणा
त् उभौ उपसर्गकारकपूर्वस्य किम् परमनियौ परमनियः अनेकस्वरस्य किम् नियौ नियाम्
कुमारीमिच्छति कुमारी ब्राह्मणवत् कुमारी नाह्रसेपतिसिलोपः अमिशसि कुमार्यं कुमार्यौ कुमा
र्यः शेषं वधूशब्दवत् सखायमिच्छति सखीयति ततः क्विप् यलोपः यलोपो एकदेशविकृ
तस्यानन्यत्वात् आप्ते सखा सखायौ सखायः हे सखीः सखायम् सखायौ सख्युः सख्युः
सख्यि सह खेन वर्तते सखः तमिच्छति सखीः सख्यौ सखनमिच्छति सखनीः सुख्यौ ख्यौ तीभ्यां कृत
यादेशाभ्यां ङस्य उः सख्युः सख्युः उकारस्यानत्वाद् गोरटपिलू नमिच्छति लूनीः लूनः तामेश
लीलमिच्छतीति तामीः ताम्यः शुष्कमीः शुष्कम्यौ शुष्कम्यः शुष्कीः पक्कीः कृतयादेशानामा
वाज्ञोत्वमज्ञाक्यिः पक्कियः हूहूः हूह्वौ हूह्वः हूहूम् हूह्वा हूहून् वातप्रमीवत् एवं दन्भूः अ
तिवन्भूः वधूशब्दवत् खलपूः खलप्वौ खलप्वः एवं सुल्वादयः स्वयंभूः स्वयंभुवौ स्वयं

© Dharmartha Trust J&K. Digitized by eGangotri

भुवः एवं स्वयंभू कटभू हन्भू कारभू एवमन्यादयः वर्षाभूः वर्षाभ्वौ वर्षाभ्वः वर्षाभ्वम् वर्षाभ्वौ व
र्षाभ्वः एवं पुनर्भूः हन्भू करभू शाङ्र्भूः सेडाः ऋकारोऽनामन्त्र्यस्य से डा भवति सौ परे पिता एवं स ऋ
कारोऽरस्या भवति पितरौ पितरः पेरर् ऋकारोऽनामन्त्र्यस्य पेर भवति सौ परे हे पितः पितरं पि
तरौ पितॄन् ऋतोऽङः पितुः पित्रोः ङौ ऋकारस्यार् भवति ङौ परे पितरि एवं जामातृ भ्रात्रादयः नुर्वा
नामि दीर्घः नृणाम् नॄणाम् शेषं पितृवत् स्त्वराद् ऋकारस्तृप्रत्ययसंबंधी तस्य ऋकारस्यार् भवति पंच
सु कर्ता कर्तारौ कर्तारः कर्तारं कर्तारौ कर्तॄन् उद्गातृ नप्तृ नेष्टृ त्वष्टृ क्षत्तृ होतृ पोतृ प्रशास्तॄणां च
उद्गातारम् क्रोष्टुशब्दस्य शेसि पंचस्वपि शसि योवा तृवद्रूपम् क्रोष्टा क्रोष्टारौ क्रोष्टारः क्रोष्टून् टादौ स्व
रे क्रोष्टुशब्दस्य तृवद्वा क्रोष्ट्रा क्रोष्टुना क्रोष्ट्रे क्रोष्टवे क्रोष्टुः क्रोष्टोः क्रोष्ट्रोः क्रोष्ट्वोः कृतान्तकृतेअसंबन्धी
यो विधिः स नित्यः नित्यानित्ययोर्मध्ये नित्यविधिर्बलवान् क्रोष्टूणाम् क्रोष्टरि क्रोष्ट्रोः क्रोष्ट्वोः क्रो
ष्ट्रोः क्रोष्टुषु सेः सखायौ सखायः हे सखे स्मलाईले स्त्रीयेन सख्स्नेः रैस्भिः रैशब्दस्याकारादेशः सकार
भकारादौ विभक्तौ राः रायौ रायः राभ्यामित्यादि ओतौ ओकारस्यौकारो भवति पंचसु गौः गावौ
गावः हे गौः अम्शसोः ओकारस्यात्वं भवति अमि शसि गां गावौ गाः ङस्य गोः एवं स्मृतः द्योशब्देन
समस्तौ स्मृतावौ द्यौः द्यावौ द्यावः इति स्वरान्ताः पुंलिंगाः आपः आदेरा टावेनान्यस्य सेलौ ए
भवति सर्वदेशात्किम् प्रतिरवट्टः ङे आदेरा टावेनान्यस्य ओर् भवति रंगे रंगाः पिबीः आदेरा

सा
वं
८

9

वेतास्यरोपिरी भवति हे गंगे गंगाम् गंगे गंगाः टौसोरे आदंतस्याबंतस्य टौसोरेत्वं भवति गंगया हि-
तोयट् आदंतादाबंतात्परेषां ङेङसिङसङीनां यडागमो भवति गंगायै गंगायाः आत्तुः आदंतादाबंता-
त्परस्य ङेराम् आदेशो भवति गंगायाम् गंगयोः गंगासु एवं श्रद्धा मेधा उमादयः अम्बादीनां द्विस्वरा-
णां धौ ह्रस्वः हे अम्ब हे अक्क हे अल्ल द्विस्वराणामिति किम् हे अंबिके यतोस्य आदंतात्सर्वादेः प-
रस्य यट् स्मडागमो भवति पूर्वस्य चापो ऽकारः सर्वस्यै सर्वस्याः सर्वासाम् सर्वस्याम् एवं विश्वादयः
आदंताः जरा जरसौ जरसः जराः द्विक समासे बहुव्रीहौ सर्वादेर्वा सर्वकार्यम् दक्षिणपूर्वस्यै
दक्षिणपूर्वायै उत्तरपूर्वस्याः उत्तरपूर्वायाः अंतरस्यै शालायै बाह्यायै परस्यार्थः अथ टीकाके नैरुक्तेनता
येनताये विभाषाप्रकरणे तीयस्योपसंख्यानम् द्वितीयस्यै द्वितीयायै तृतीयस्याः तृतीयायाः
नासिकाया नस् नासिकानसः नासिकया नसा नोभ्याम् नासिकाभ्यां एते पंच स्वरांताः वत् इ-
तनायाः पृतः पृतनाभ्याम् निशायाः निशः निशा छशषराजादेः षः छकारांतस्य शकारांतस्य ष-
कारांतस्य च राज यज मृज सृज भ्रस्ज व्रश्च भ्राज आदेः षकारो भवति धातोः केसयरे नान्तसूत्रे से
परेपदांते च षोडः निड्भ्यां निशाभ्याम् निड्सु निट्सु केचित्तु धातोरेव षत्वमाहुः तन्मते नभेन
भाः इति निज्भ्याम् निशब्दस्तु त्वेन गोपा सोमपा वत् बुद्धिः बुद्धी बुद्धयः इदुद्भ्याम् स्त्रियां वर्तमाना
भ्याम् इकारोकाराभ्यां परेषां ङितां वचनानां वा आडागमो भवति बुद्ध्यै बुद्धये बुद्ध्याः बुद्धेः स्त्रियाः बु

© Dharmartha Trust J&K. Digitized by eGangotri

ध्याम् भ्रुडागमाभावश्चामोप्यभावः वृद्धौ एवं मतिभूतिनत्यादयः धेनुरज्जुदन्वादयोप्येवम् त्रिच
तुरोः स्त्रियां तिसृचतसृवत् स्त्रियां वर्तमानयोस्त्रिचतुरशब्दयोः तिसृचतसृ इत्येतावादेशौ भवतः
विभक्तौ ऋकारस्य ऋकारवत् ऋतो रात्र ऋकारा न भवति सेरायेरत्र न भवति तिस्रः २ तिसृभिः
तिसृभ्यः २ न तिसृचतसृ स्त्रो नामि दीर्घः तिसृणाम् स्त्रियामिति विवर्तविशेषणान्नेह प्रियास्तयस्रो
ऽस्त्रीवायस्याः सा प्रियत्रिः वृद्धिवत् आमि प्रियत्रयाणाम् एवं स्त्रियाम् मुख्ये लिंगान्तदेशो गौणे न दे
नोक्तः प्रियास्तिस्रो यस्य सः प्रियतिसा द्वे प्रियतिसः प्रियतिस्रौ प्रियतिस्रः नाम्यासोरह्लोपः प्रि
यतिसृम् प्रियतिस्रः प्रियास्तिस्रो यस्य तत्कुले प्रियत्रि कुलं किंतु त्रिमित्रमिति ग्रस्या नित्यत्वात्सते
प्रियतिसृ प्रियतिसृणी हादौ स्वरे टादौ विनिश्चेवत् प्रियतिसृणा प्रियतिस्रा हेरत्वे सत्याप्रह्रे २ ह्र
भ्यां २ ह्रयोः २ ह्रसेपः सेर्लोपः नदी नद्यौ नद्यः नदीम् नद्यौ नदीः नद्या ङितामट् नद्यै नद्याः नदी
नाम् नद्याम् एवं ब्राह्मणी सखी कुमारी गौर्यादयः लक्ष्मीः भ्रणीत्वेतन्वात्रसिलोपः धीह्रस्वः
हेलात्सिशेषं नदीवत् एवमवीतरीतंत्रीप्रभृतयः ईवंतत्वात्सिलोपः स्त्री स्त्रीस्नोः स्त्रीश
ब्दस्य भ्रूशब्दस्य चेयुवौ भवतः स्वरे परे स्त्रियौ स्त्रियः हे स्त्रि वाम्याम्सि अमि शसि च परे स्त्रीशब्दस्य वे
यू भवति स्त्रियम् स्त्रीम् स्त्रियौ स्त्रियः स्त्रीः स्त्रिया स्त्रीभ्याम् स्त्रीभिः स्त्रियै स्त्रीणाम् स्त्रियाम्
स्त्रियमतिक्रान्तः अतिस्त्रिः अतिस्त्रियौ एतन्नाभावोऽनुद्धिः सर्वस्यैः पुंसि वाच्यते क्लीबेनुम

© Dharmartha Trust J&K. Digitized by eGangotri

सा
वं
१०

10

वत्तो शब्दस्य सु ऐ सवर्णान्ताम् अतिसखयः हे अतिसखे हे अतिसखियौ हे अतिसखयः अतिसखियम् अ
तिसखिम् अतिसखियः अतिसखीन् अतिसखिना अतिसखये अतिसखेः २ अतिसखियोः अतिसखीनाम् अति
सखौ अतिसखिषु अस्यौकारे वृत्तित्वं स्यादस्मात्सो स्त्वविभाषया इत्यादेशस्तु नान्यत्रासखियः पुंस्त्वप्रस
ङ्गेन स्त्रीवेत्तनम् अतिसखि अतिसखिनी अतिसखीनि अतिसखिना अतिसखये अतिसखिनो अतिसखेः अति
सखिनः अतिसखीनाम् अतिसखौ अतिसखिनि सखियांत शब्दे णत्वं वत् शासि अतिसखीः अतिसखियः अ
तिसखिया इत्यादि अतिसखये अतिसखये अतिसखियाः अतिसखेः अतिसखयोः अतिसखीनाम् अतिसखियां
अतिसखौ अतिसखिषु श्रीः श्रियौ हे श्रीः वेश्रुवः इत्यवं नादिदुतामनुड्वास्त्रीविना श्रियै श्रिये श्रियाः श्रि
यः श्रियोः इत्यवं नाटामो नुड्वास्त्रियां त्वनित्यम् श्रीणां श्रियाम् श्रियि प्रत्ययाभावे प्रामोप्य
भावः एवं धीः स्त्री श्रमनयः भ्रूः श्रमनयश्च प्रधीशब्दस्य लक्ष्मीवद्रूपम् केषांचिन्मते तत्पुंवत् प्रकृ
ष्टा धीरिति विग्रहे लक्ष्मीवदेव प्रमिथ्यासिद्धम् प्रध्यइति विशेषः सुष्ठु धीर्यस्याः सुष्ठु ध्यायति
वेति विग्रहे सुधीः श्रीवद्रूपम् केषांचिन्मते पुंवत् सुष्ठु धीरिति विग्रहे तु श्रीवदेव ग्रामणीः पुं
वत् एवं खलप्वादिः नृशब्देषु नकारान्तात् टकारान्तात् णान्तात् स्त्रियामीप्प्रत्ययो भवति क्रोष्टोः
क्रोष्ट्रोः वध्वजम्वादयो नदीवत् पुनर्भूः पुनर्भ्वौ हे पुनर्भु पुनर्भूणाम् पुनर्भ्वाम् भेकां
पुनर्नवा यांस्त्रीवर्षाभूर्दर्दुरे पुमान् हेवर्षाभु स्वयंभूः पुंवत् नकारान्तसंख्यायाः स्वसृतिसृवत् १०

© Dharmartha Trust J&K. Digitized by eGangotri

न्तृवन्नाप्तृइति तृप्रत्ययान्तमात्रमप्यनेनैवेष्ट मातापितृवत् स्वसा कर्तृवत् पौत्रमातृः स्वसृः गाः ग्र
वत् इति स्वरान्ताः स्त्रीलिङ्गाः अतोमश्चकारान्तान्नपुंसकलिङ्गात्परयोः स्यमोर् भवत्यधौ कुलम्
इमौ नपुंसकलिङ्गात्परश्चौरीमापद्यते कुले जस्शसोः शिः नपुंसकलिङ्गात्परयोर्जस्शसोः शि
भवति नुमागमः नपुंसकस्य नुमागमो भवति शौ परे यमप्रत्याहारान्तस्य न कुलानि २ हेकुल
शेषं देववत् एवं मूलकादयः अन्यादेः अन्यादेः क्लीबात्परयोः स्यमोः तुर्भवति अन्यत् वाव
साने अवसाने वर्ते मा मा लोक सानां जवा भवे विवणा वा पश्चात् दृश्ये अन्यानि अन्यत् इतरत् अन्या
दे वैलोपोन हे अन्यत् इतरत् कतरत् कतमत् एकतरत् एकतरम् शेषं सर्ववत् यो यमाश्रित्यो
त्पद्यते स तं प्रति सन्निपातः सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति सोऽयमादेशो सन्निपा
तपरिभाषया न जरस् अजरम् अजरसी अजराणि त्यमहतोर्धातोर्दीर्घः शौ च त्यन्तस्य महतश्च
स्य महतश्चाद्यस्य च दीर्घो भवति पञ्च स्त्रीपि च शौ च अजरांसि अमिलके पवादः संभावे वापि त्वा
जरस् तनसन्निपातपरिभाषया न जरस् अजरसम् अजरम् अजरसी अजरे अजरांसि अजराणि
शेषं निर्जरवत् हृदयोदकास्यमांसानां हृदुदन्नासन्मांसः हृदि हृदा हृद्भ्याम् उदानि उदा उद
भ्याम् आसानि आस्ना आसभ्याम् मांसि मांसा मांसभ्याम् नपुंसकस्य ह्रस्वः श्रीपं कुलवत्
नपुंसकात्स्यमोर्लोपः अस्थि दृष्टं नपुंसके धौ गणो वा हे अस्थे हे अस्थि नामिनः स्वरे नामन्तस्य

© Dharmartha Trust J&K. Digitized by eGangotri

सा॰ वं॰ २२

नपुंसकस्य नमागमो भवति स्यादौ स्वरे परे अस्थिनी नोपधायाः अस्थीनि अस्थ्ना अस्थ्नां शसादौ अ
स्थ्यादीनां नमागमो भवति आकारादौ स्वरे परे इकारस्य वाकारः अल्लोपः स्वरेः म्वयुक्ताच्छसादौ
अस्थ्नाम् अस्थ्ने अस्थ्नोः अस्थ्नाम् ङेङ्योः अस्थ्नि अस्थनि अस्थिषु एवं दधिसक्थ्यक्षि प्रभृति शब्दाः तदंतस्या
पीष्टिः प्रियास्थ्ना अतिदध्ना वारि वारिणी वारीणि वारीणाम् आमो नुट् वारिषु नपुंसकस्य ग्रामणि ग्रा
मणिनी ग्रामणीनि पुंवत्वं तृतीयादावुक्तपुंस्कं पुंवद्वा अवृद्धिनिमित्ते कोऽक्तपुंस्कं नाम्यंतनपुं
सकलिंगं तदादौ स्वरे परे पुंवद्वा भवति ग्रामण्या ग्रामणिना ग्रामण्याम् ग्रामणीनाम् ग्राम
ण्याम् ग्रामणिनि प्रधि प्रध्या प्रधिना सुधि सुधिया सुधिना मधु मधुनी मधूनि २ हे मधो हे
मधु एवमश्वादयः सानु सानुनी सानूनि स्नुना सानुना स्नुभ्यां प्रियक्रोष्टु प्रियक्रोष्टुनी प्रिय
क्रोष्टूनि प्रियक्रोष्ट्वे प्रियक्रोष्टवे प्रियक्रोष्टुने प्रियक्रोष्टुः प्रियक्रोष्ट्वोः प्रियक्रोष्टुनः खलपु ख
लपुनी खलपूनि खल्वा खलपुना एवं लव्वादयः धातृ धातृणी धातॄणि हे धातः हे धातृ एवं ज्ञा
त्रादयः ह्रस्वादेशो संध्यक्षराणामिकारोकारौ वक्तव्यौ अतिरि अतिरिणी अतिरीणि
अतिराया अतिरिणा अतिरिभ्याम् अतिरिभिरित्यादि प्रद्यु प्रद्युनी प्रद्यूनि अतिनु अतिनुनी अ
तिनूनि अतिनावा अतिनुना इति स्वरांता नपुंसकलिंगाः अनडुहश्च पुंसि पंचसु शौ चान
डुह आमागमो भवति शौ पि वा सावनड्वुहः अनडुहः सौ नुमस्यात् संयोगांतस्य लोपः स्यादौ रसे ॥

पदांतेच संभित्रस्यदात्र अनड्वान् अनड्वाहौ अनड्वाहः आवम् चतुरनडुहोरामागमो भवति
आम्रे हे अनड्वन् वसांरसे वसुस्रंसुध्वंस्वनडुहामित्येतेषां दत्वं भवति रसे पदांतेच अन
डुद्भ्यां अनडुत्सु दादेर्धः आघोष्वारणे दादेर्धातोर्हकारस्य घत्वं भवति धातोः के सपरे नाम्न अस्वर
से पदांतेच आदिजबानां झभांतस्य झभाः स्ध्वोः धातोर्झभांतस्यावयवस्यादेर्जबानां जबाना
झभा भवंति सकारे ध्वशब्दे भकारे च परे पदांतेच धुक् धुग् दुहौ दुहः धुग्भ्याम् धुक्षु
आघोष्वारणे किम् दामलिट् गर्दभमाचष्टे गर्दभयति गर्दप् होढः हकारस्य ढत्वं भवति धा
तोः के सपरे नाम्न अस्वरसे पदांतेच लिट् लिड् लिहौ लिड्भ्याम् लिट्सु लिट्त्सु मुहादेर्वा मुहष्णुह
ष्णिहष्णिहां ढत्वं वा ध्रुक् ध्रुग् ध्रुट् ध्रुड् ध्रुग्भ्याम् ध्रुड्भ्याम् ध्रुक्षु ध्रुट्सु ध्रुट्त्सु एवं मुहष्णुहष्णिहः
वाहो वौ शसादौ स्वरे वाहो वा शब्दस्य औकारादेशो भवति शसादौ स्वरे परे न हि तेरे पिरकारेच
विश्वौहः विश्वौहा विश्ववाड्भ्याम् विश्ववाड्भिः विश्ववाट्सु सहेः साड् साड्रूपे सति सहेः
सस्य षो भवति तुराषाट् तुराषाड् तुरासाहौ तुरासाहः तुराषाड्भ्याम् तुराषाट्सु दिव औ दि
वोन्त्यस्य औकारादेशो भवति सौ परे द्यौः सदिवौ सदिवः उ रसे दिव उदादेशो भवति रसे पदां
तेच द्युभ्याम् द्युषु चतुरो ह्वो नि संबुद्धौ वचनेषु नः चतुराम् चतुरो ह्वस्य आमागमो भवति
पंचसु घौ च चत्वारः चतुरः चतुर्भिः चतुर्भ्यः २ रः संख्यायाः रेफान्तसंख्यायाः परस्या आमो नुडागम

© Dharmartha Trust J&K. Digitized by eGangotri

यक्त प्रियाश्चत्वारः

सोभवतिचत्वारोचतसृवृत्तर्षितिनिर्देशाद्रेफस्यविसर्गोनृप्रियायासौप्रियचत्वार्यस्याः साप्रियचत्वाः
सा प्रियचत्वारौप्रियचत्वारः हेप्रियचत्वः गौणत्वेनुप्रियचत्वराम्प्रधानेस्यादेवपरमचत्वारोम क
वं मलेकमलौवावृत्ताणः कमलकमलौकमलः सोनोधातोः सोनस्यधातोर्मस्यनोभवति इसे
12 १२ परेतेवमयोरश्चनस्यलोपोन प्रशान्प्रशान्तौप्रशान्तः कः कौके शेषंसर्ववत् इदमोयंपुंसि इ
दमः पुंसिसावयं भवति अयम् इदमः स्यदादेरकारस्यमत्वंभवतिस्यादौ इमौइमे स्यदादीनां
संबोधनाभावः इमम् इमौइमान् अनटौसोः इदमोनादेशोभवति टौसोः परयोः अनेन अनयोः
सकारभकारादौपरेइदमोकारादेशोभवति हलन्तस्याभ्याम् भिसिभिस् इदमइदमोभिसएभि
सेवभवति नमकारस्याकारः एभिः अस्मैआभ्याम्एभ्यः २ अस्मात्आभ्याम्अस्यअनयोः २ एषा
म्अस्मिनएषु इदमेतदोरन्वादेशेद्वितीयाटौस्स्वेनएनद्वा एनम्एनान्एनेनएनयोः किंचित्
कार्यंविधातुमुपात्तस्यकार्यान्तरंविधातुंपुनरुपादानमन्वादेशः यथानेनव्याकरणमधीतं
एनंछन्दोध्यापयनोपधायाः नाम्नोनोलोपशसौ राजाराजानौराजानः हेराजन् अल्लोपःस्व
रेज्ञपञ्चमादिष्वसादौ जज्ञोर्ज्ञः जकारञकारयोर्योगेज्ञोभवति राज्ञः राज्ञा राजभ्याम् राजभिः
नस्यलोपाशीनविभक्तिकार्यम् पंचस्थितिप्रापकात्प्रतिराजनिएवंवृषादयः यज्वनः यज्व
ना यज्वभ्याम् यज्वसु आत्मनः आत्मना प्रतिदिवा अल्लोपेकृते धोर्विहसे यानोरिङ्तोदीर्घोभ १२

© Dharmartha Trust J&K. Digitized by eGangotri

वतिरेफवकारयोर्हसपरयोः पदांतेच प्रतिदीव्नः प्रतिदिवभ्याम् प्रतिदिवस्सु श्वाश्वानौ श्वानः
श्वादेः श्वादेर्वकारउत्वंशसादौनिशसादौस्वरेपरेईपीकारेच शुनः शुना श्वभ्याम् श्वसु युवा यु
वानौ युवानः यूनः यूना युवभ्याम् युवसु मघवा मघवानौ मघवानः मघोनः मघोना ॥ यवे
णत्वसावगजः ॥ नाशारहितस्यार्वन्तस्यतृइत्येतादेशः स्यान्नतसौ त्रितोत्तम् उकारान्तुवंथ
स्यम्मकारान्तवेंथस्यचनुमागमोभवति पुंसि पंचस्व अर्वन्तौ अर्वन्तः अर्वद्भ्याम् अर्वत्सु अनञः
किं अनर्वाणौ अर्वाणोकिम् अर्वा इत्येतेचस्व मथिन्मथिन् ऋभुक्षिन् शाह्यानामिकारस्याका
रादेशोभवति पुंसिपंचस्वथौच थोन्तः पथिमथ्योस्थस्यन्थइवति पुंसिपंचस्वथौच आसौ पथि
मथि ऋभुक्षांटेरात्वंभवति सौपरे पन्थाः पन्थानौ पन्थानः हेपन्थाः पन्थानम् पन्थानौ प
थोटेः मथिमथिऋभुक्षांटेर्लोपोभवति शसादौस्वरेईपीकारेच पथः पथा पथिषु एवं मन्थाः
ऋभुक्षाः स्त्रियांनान्तत्वादीप् सपथी समथी ऋभुक्षीपुरी क्रोष्टुः पथिवनम् पौनष्टसका
रोनस्यलोपश्चा हेसपथिन हेसपथि हेसपंथानि इत्येतौसौ इनहन्पूषन्अर्यमन्इत्येतेषां
शौसौचापोपरे उपधायादीर्घोभवति नान्यत्र देशे हेदंडिन् एवं ससलिनरुपशालिनऋभुक्षयः
हृद्भ्रहाहृद्भ्रहाणौ हनोघ्ने हन्तेर्हकारस्यघोभवतिनकारेञ्णितिचपरे वृत्रघ्नोघ्नात्वेन वृत्र
घ्नः वृत्रहभ्यामित्यादि एवंपूषन्अर्यमन्नभृतयः संख्यायाष्णान्ताः पंचन्प्रभृतयोवक्ष्यन्तेलिङ्ग

© Dharmartha Trust J&K. Digitized by eGangotri

सा
वं
१३ 13

सद्रूपाः जश्शसोर्लुक् षकारनकारांतसंख्यायाः परयोर्जश्शसोर्लुग्भवति पंच २ पंचभिः पंचभ्य
भ्यः षकारनकारांतसंख्यायाश्चामो नुट् पंचानाम् गौणत्वेन लुङ्नुटौ प्रियपंचा प्रियपंचानौ
प्रियपंचानः प्रियपंचानम् एवं सप्तन्नवन्दशन्शब्दाः अष्टनो डौ अष्टन्याम्नां परयोर्जश्शसो
र्वा डौ भवति अष्टौ २ अष्ट २ वा भ्यसोः अष्टनः सकारभकारादिषु वात्वम् अष्टाभिः अष्टभिः अष्टा
भ्यः अष्टभ्यः अष्टानाम् अष्टसु अष्टासु प्रियाष्टा प्रियाष्टानौ प्रियाष्टानः प्रियाष्टः प्रियाष्टा प्रिया
ष्टाभ्याम् प्रियाष्टौ राजनवत् सर्वं हाहावद्विश्वपाः पंचेद्रसे सुगण् सुगणौ सुगणः सुगणम् सुगणाट्
सु भुक् भुग् बुधौ बुधः बुधं बुत्सु वाक् वाग् वाचौ वाचः वाग्भ्याम् वाक्षु सककुप् सककुब्
सककुभौ सककुप्सु युजेः पंचस्य नुम् नसमासे इति च दिशाम् दिशदृशस्पृशदधृष्टमृत्विज्
क्रुञ्च युञ्ज् सञ्ज् ग्रुञ्च उक्लिहादीनां कत्वं भवति स्यादौ असेपदांते च युङ् युञ्जौ युञ्जः समा
सेन सयुक् चोः कुः चवर्गस्य कवर्गादेशो भवति धातोः केसेना स्वन्नस्य असेपदांते च समाध्यथे
स्यपुजेन्नुश्च युक् युग् ऋत्विक् ऋत्विग् ऋत्विजौ ऋत्विजः ऋत्विग्भ्याम् ऋत्विक्षु व्रश्चराजादेः षः सम्राट् सम्राड्
सम्राजौ सम्राजः देवेट् देवेड् देवेजौ देवेजः परिमृट् परिमृड् परिमृजौ परिमृजः विश्वसृट्
विश्वसृड् विश्वसृजौ विश्वस्य वसुराटोः दीर्घः विश्वावसुः विश्वाराट् विश्वाराड् विश्वाराजौ
विश्वाराजः विश्वाराड्भ्याम् विश्वाराड्भिः विश्वाराट्सु स्कोराद्योश्च संयोगाद्योः सकारकका १२

रयोर्लोपो भवति धातोर्झसे परे नाम्नश्च रसे पदान्ते च भृट् भृड् सम्यग्भृज्जते शास्तस्य कभेन
ज्ञइति जः भृज्जौ भृज्जः भृड्भ्याम् भृट्सु हृट् हृड् हृषौ हृषः विभ्राट् विभ्राड् विभ्राजौ विभ्राड्
भ्याम् विभ्राट्सु विभ्राट्त्सु सविकस्पविगसनविजैसनविज्ञ ऊर्क् ऊर्ग् ऊर्जौ ऊर्जः ॥ नः स
रादेस्तस्य सत्वं भवति सौ परे स्यः त्यौ त्ये सः त्योत्ते सेनोपोगोगात्वेचात्व सत्वेन स्यत् स्यद् स
हे अतिस्यत् यः यौ ये यथः यतौ यते यतम् यतौ यतान् अन्वादेशे एनम् एनौ एनान् एनेन
एनयोः २ अग्निमत् अग्निमद् अग्निमथौ अग्निमथः अग्निमद्भ्याम् अग्निमत्सु अञ्चुवतीति क्वि
पि कृते नोलोपः धातोर्हसान्तस्योपधाभूतस्य नकारस्य लोपः क्विति परे प्रत्यायोन्वितेन
ति कृपपदात क्रुञ्चः क्विपि च अञ्चेः शुमिपञ्चसत्वम् दिशाम् प्रत्यङ् प्रत्यञ्चौ प्रत्यञ्चः
प्रत्यञ्चम् अञ्चेर्दीर्घश्च नलोपि नोन वनेरकारस्य लोपः पूर्वस्य दीर्घः शसादौ स्वरे तद्धित
यस्वरयोरीपी काशेच प्रतीचः प्रतीचा प्रत्यग्भ्याम् प्रत्यक्षु तिर्यङ् तिर्यञ्चौ तिर्यञ्चः ति
रश्चादयः तिरश्चादयो निपात्यन्ते शसादौ स्वरे तद्धितयस्वरयोरीपी काशेच तिरश्चः तिरश्चा
तिर्यग्भ्याम् तिर्यक्षु उदङ् उदञ्चौ उदञ्चः उदीचः उदीचा उदग्भ्याम् उदक्षु पितर
मञ्चतीति पित्र्यङ् पित्र्यञ्चौ पित्र्यञ्चः मतोदीर्घो न पित्र्यचः पित्र्यचा पित्र्यग्भ्याम् पित्र्यक्षु
सध्र्यङ् सध्र्यञ्चौ सध्र्यञ्चः सध्रीचः सध्रीचा प्राङ् प्राञ्चौ प्राञ्चः अञ्चेर्दीर्घश्च प्राचः

© Dharmartha Trust J&K. Digitized by eGangotri

सा
वे
१४

14

प्राचा प्राक् पूजायांतु प्रत्यञ्चः प्रत्यञ्चा प्रत्यग्भ्याम् प्रत्य भिः उदञ्चः उदञ्चा उद भ्याम् तिर्यञ्च
ः तिर्यञ्चा तिर्य भ्याम् सम्यञ्चः सम्यञ्चा सम्य भ्याम् सध्र्यञ्चः प्राञ्चः प्राञ्चा प्रा भिः
अमुमञ्चतीति विग्रहे अदस् अद्रि इति स्थिते ततो टेरि अन्द्रि इति स्थिते इयत्यितियत्वम् दस्यमः मा
द् ह्रस्वश्चानयोर्ह्रस्वः दीर्घस्य तु दीर्घः अमुमुयङ् पक्षे तु केचिदद्रेति केचिदद्रेतिमन्यन्तः उभ
योः केचिदद्रेति केचिदद्रेति नोभयोः अमुमुईचः अमुमुयग्भ्याम् एवं अदमुयङ् अमुद्र्यङ् अमु
द्रीचः अदद्र्यङ् अदद्र्यञ्चौ अदद्रीचः अदद्र्य भ्याम् पूजायांतु अमुमुयञ्चः अमुमुयञ्चा अमुमु
य भ्याम् अदमुयञ्चः अदद्र्यञ्चः त्रिंशतोन्त्यम् ततः महतो पृषोदीर्घः यो च महान् महांतौ म
हान्तः हे महन् हिंसकानां नतादीनां च शतनुम्न्वा ददत् ददतौ एवं जक्षत् जाग्रत् दरिद्र
त् चकासत् शासत् ॥ अत्वसोः सौ ॥ अन्त्वं तस्याधातोरसंतस्य चोपधाया दीर्घः स्यात् सौ भवान् भवं
तौ हे भवन् वेदमाः अयात संतस्यति किम् ची गोमि वत्समी चोरवः धातोरन्तस्य अत्वेन त्वा मा
वाञ्चदीर्घः भवन् भवंतौ एवं नदीमान् धीमान् हे धीमन् धीमंतौ मघवान् मघवंतौ मघवद्भ्याम्
गुणवत् गुणवद्भ्याम् नादृक् नादृग् नादृशौ नादृक्षु एवं यादृग्तादृग्ः नशेः कोवापदांते स्या
दीकसेवलकलग् नट् नड् नशौ नड्भ्याम् नड्साम् नक् नक्षु विट् विड् विशाम् दिशाम्
स्पृक् स्पृग् स्पृशौ घृतस्पृक् उदकपूर्वस्य तु न कुत्वम् उदकस्पृट् उदकस्पृड् दधृक् दधृग् १४

© Dharmartha Trust J&K. Digitized by eGangotri

दध्नौदध्नुषः रत्नमुट् रत्नमुड् रत्नमुषौ रत्नमुड्भ्याम् षषः षष्ठो नित्यं बहुवचनान्तो नास्ति षसन्तूपः न
स्मासोर्लेक् षट् षड् १ षड्भिः षड्भ्यः २ ऋतः इकारस्य णो भवति नामि परे षण्णाम् षट्सु षट्त्सु
परमषट् परमषड् परमषण्णाम् णोणत्वे न लुङ्नुदो प्रियषट् प्रियषड् प्रियषषौ प्रियषषः प्रि
यषषाम् दोषाम् दोषादीनां रेफो भवति रसेपदान्ते वदोः दोषौ शसादौ वा दोषन् दोषः दोष्णः
दोषा दोष्णा दोर्भ्याम् दोषाभ्याम् दोष्षि दोषणि दोषि मविसर्गेनुस्यानि कार्यस्वावव्यवधानेपि
किलान्यरसूषः दोष्षु दोष्षु दोष्षु स्पृशि विंहते पिपठीः पिपठिषौ पिपठीर्भ्याम् पिपठीष्षु विवि
ट् विविड् विविड्भ्याम् विविट्सु विविषौ स्कोरादयोश्च नट् नड् नशौ नड्भ्याम् गोरट् गोरड् गोरट्सु नतिरस्तोः संयोग
न्तलोपस्त्येके नक् नग् गोरक् गोरग् कलोपे कृते सिद्धम् पिपक् पिपग् पिपठौ पिपक्षु एवं विवक् विवग्
विवक्षौ सुपीः सुपिषौ सुपीर्भ्याम् सपीः षु सपीष्षु एवं सजूः सजुषौ सजूर्भ्याम् विद्वान् विद्वांसौ हे
विद्वन् वसोर्वः उः वसोर्वकारस्योत्वं भवति शसादौ स्वरे न हि तद्यकारे स्वरे च ईयोकारे च विदुषः
विदुषा विद्वद्भ्याम् विद्वत्सु सेदिवान् वस्योत्वे इट् अभावः सेदुषः सेदुषा सेदिवद्भ्याम् ऊषिवान् ऊ
षुषः ऊषिवद्भ्याम् शाशकृवान् शशृकांसौ नेथान्तोः शाशकुषः शाशकृवद्भ्याम् ध्वंस् हस्वन्हंसाद
वयोर्दधातोसंयतनेसाह्विन् सहिंसौ सहिन्भ्याम् सहिन्सु धन धसौ धद्भ्याम् एवं स्रत् पुंसोम
स् पुंसोमसुडादेशो भवति पुंसि पञ्चस्थानेषु च पुमान् पुमांसौ पुमांसः हे पुमन् पुंसः पुंसा पुंसुवेधाः

© Dharmartha Trust J&K. Digitized by eGangotri

सा
वं
१८

15

वेधसौ हेवेधः वेधोभ्याम् उशनसाम् उशनस् शब्दस्य सम्बुद्धौ सौ सेरपेक्षोभवति उशनाः उशन
सौ यौ नांतनलोपेनलोपश्च वा वक्तव्या हे उशन हे उशनन् हे उशनः उशनोभ्याम् उशनस्सु सोसः
अदसोऽदस्यसः सौ सेरौ अदसः सेरौस्यात् असौ दस्यसः सादू अदसोसाइस्य ऊश्च भवति अमू
जसो परो बहुत्वे अदसपकारस्य ईर्भवति बहुत्वे अमी अमुम् अमू अमून् अमुना अमूभ्याम् अमी
भिः अमुष्मै अमूभ्याम् अमीभ्यः अमुष्मात् अमूभ्याम् अमीभ्यः अमुष्य अमुयोः अमीषाम् अमुष्मि
न् अमुयोः अमीषु इति हलन्ताः पुंलिङ्गाः नहो धः नहो हकारस्य धो भवति धातोः के सपदे ना
न्त्यस्य सेपदान्ते च उपानत् उपानद् उपानहौ उपानहः उपानत्सु उष्णिक् उष्णिग् उष्णिहौ उष्णि
ग्भ्याम् द्यौः दिवौ दिवः उवसे द्युभ्याम् द्युषु द्योर्विह्से गीः गिरौ गीर्षु एवं पुरादयः चतस्रः प्र
तिवत् प्रियचत्वाः हे प्रियचत्वः इयं स्त्रियाम् इदमस्त्रियामियम् सौ इयम् इमे इमाः इमाम् अ
नया अस्यै अस्याः आभ्याम् आभ्यः अस्याः अनयोः आसाम् अस्याम् अनयोः आसु अन्वादेशे
एनाम् एने एनाः एनया एनयोः २ स्रक् स्रजौ स्रग्भ्याम् स्रक्षु समित् समिधौ समिद्भ्याम् स
मित्सु स्या स्ये स्याः स्याम् तया ताभ्याम् २ ताभिः तस्यै ताभ्यः २ एवं तद् यद् एतद् किं वाक् वा
चौ वाग्भ्याम् वाक्षु ककुप् ककुभौ ककुब्भ्याम् ककुप्सु त्वक् त्वचौ स्रक् स्रजौ स्रजः अप्शब्दो
नित्यं बहुवचनान्तः स्वेमहतोर्दीर्घः शौच आपः अपः भिदपाम् अपूशब्दस्य दत्वं भवति भका १८

© Dharmartha Trust J&K. Digitized by eGangotri

गादौ विभक्तौ अद्भिः अद्भ्यः अपाम् अप्सु दिक् दिग् दिशौ दिशः दिग्भ्याम् दिशा दिग्भिः दिक्षु दिशो दिशाम् द
कृदृग् दृशौ सहस्रपते सजूः सजुषौ सजूर्भ्याम् सजूःषु सजूष्षु आशीः आशिषौ आशीःषु आ
शीष्षु सो असः असौ अमू अमूः मात् अमूः अमूम् अमुम् अमूभ्याम् अमूभिः अमुष्यै अ
मुष्याः अमूषाम् अमुष्याम् अमुयोः अमूषु इति हसान्ताः स्त्रीलिङ्गाः स्वनडुत् स्वनडुही स्वनड्वां
हि पुनस्तद्वत् वाः वारी वारि वार्भ्याम् वार्षु उदसे विमलद्यु विमलदिवी विमलदिवि किं के
कानि इदम् इमे इमानि अन्वादेशे एनत् एनद् एने एनानि अहः अह्नी अहानि हे अहन् अ
हः अहन्नकारस्य सो भवति रसे परे नेच अहः अह्नोः अह्नी अहनी अहानि पुनस्तद्वत् अह्ना अ
होभ्याम् कर्म कर्मणी कर्माणि एवं चर्मन् वर्मन् प्रभृतयः दंडि दंडिनी दंडीनि स्रग्वि स्रग्विणी
स्रग्वीणि वाग्मि वाग्मिनी वाग्मीनि बहुवृत्रह बहुवृत्रघ्नी बहुवृत्रहणी बहुवृत्रहाणि बहुपूष
बहुपूष्णी बहुपूषणी बहुपूषाणि बह्वर्यम बह्वर्यम्णी बह्वर्यमणी बह्वर्यमाणि असृक् असृजी
असृञ्जि असृजा असृग्भ्याम् ऊर्क् ऊर्जी ऊर्ञ्जि बहूर्जो नुम्प्रतिषे
धः बहूर्जि बहूर्ञ्जि त्यत् त्यानि तत् तानि यत् यानि एतत् एते एता
नि अन्वादेशे एनत् एने एनानि एनेन एनयोः वेभित् वेभिदी वेभिदि चेच्छिद् चेच्छि
दी चेच्छिदि गवाक् रूपाणि क्लीबे चागतिभेदतः असंख्यानामानि लोपेन वापि कर्षतमतम्

© Dharmartha Trust J&K. Digitized by eGangotri

सा० वं० १९

16

सम्यक्पसनवषष्ठ्यौ दोषट्के स्यस्त्रीगोजसामोः बत्वाविशेषदशके रूपाणीति विभावय गोरञ्चेत्यक्
गवाक् गवाग् गोअक् गोअग् गोक् गोग् गवाङ् गोअङ् गोङ् गोची गवाञ्ची गोअञ्ची गोञ्ची
गवाञ्चि गोअञ्चि गोञ्चि गोचा गवाञ्चा गोअञ्चा गोञ्चा गवाग्भ्याम् गोअग्भ्याम् गो
ग्भ्याम् गवाङ्भ्याम् गोअङ्भ्याम् गोङ्भ्याम् गवाक्ष गोअक्ष गोक्ष गवाङ्क्ष गोअङ्क्ष गोङ्क्ष गवाङ्षु गोअङ्षु गोङ्षु
तिर्यक् तिरश्ची तिर्यञ्चि तिर्यङ् तिर्यञ्ची यकृत् यकृती यकृन्ति यकानि यक्ना यकृता यकृ
द्भ्याम् यकभ्याम् शकृत् शकृती शकृन्ति शकानि शक्ना शकृता शकभ्याम् शकृद्भ्याम् ददत्
ददती ददंति एवं जाग्रदादयः वादीयोः शतः पुंवदंतोनान्यस्य शाश्वदोनुम ईकारे ईपि च तुदती
तुदंती भात् भाती भांती श्यप्योरात्रित्यम् श्यपश्यपयपस्यप संबंधिनो कारान्त्यस्य शतृनित्यं नुम् ई
कारे ईपि च परे पचत् पचद् पचंती पचंति दीव्यत् दीव्यद् दीव्यंती दीव्यंति स्वप् स्वपी नमहतो
योरीर्घः शौच स्वाम्पि दीर्घा नेत्यके स्वाम्पि स्वपा भिद्भ्याम् स्वद्भ्याम् स्वब्दिः स्वपि स्वप्सु जगत् ज
गती जगंति महत् महती महांति धनुः धनुषी नुंषसंवस्य शोरीर्घः धनूंषि हविः हविषी हवीं
षि पयः पयसी पयांसि तेजः तेजसी तेजांसि वचः वचसी वचांसि पिपठीः पिपठिषी पिपठींषि
यङ्लुगंतस्य शोनुस्व वावत् वावती वावति जाचत् जाचती जाचति सप्तम् सप्तसी सप्तमांसि ख
दः खरसुखस्त्रिविश्वमोष इति हसांतानपुंसकलिंगाः ॥ अथ अहं सिना सिसहितयोः अस्मद स्मदो स्वमद १९

© Dharmartha Trust J&K. Digitized by eGangotri

सिन्येवादेशौ स्तः त्वम् अहम् युवावौ द्विवचने युयंवावितो युष्मदस्मदोर्युवावौ भवतः विभ
क्तौ आमौ युष्मदस्मभ्यांपरयोरामं भवति युवाम् आवाम् यूयंवयं जसा जसा सहितयोर्युष्म
दस्मदोर्यूयंवयं भवतः यूयम् वयम् त्वमदेकत्वे युष्मदस्मदोस्त्वन्मदौ भवतः एकत्वे वाच्यमाने
आम्सौ युष्मदस्मदोर्हेतात्वं भवति अमिसकारेश्मिसिचपरे त्वाम् माम् युवाम् आवाम् मदा
यत्वेशासीतिदीर्घः शसोनोवक्तव्यः युष्मान् अस्मान् त्वन्मदादेशेकृते परतः अतोः युष्मदस्मदोर्
रेत्वं भवति टाङ्योः परयोः त्वया मया युवाभ्याम् आवाभ्याम् युष्माभिः अस्माभिः तभ्यंमह्यं ङया
ङया सहितयोर्युष्मदस्मदोस्तुभ्यंमह्यमेतौ भवतः तुभ्यम् मह्यम् युवाभ्याम् आवाभ्याम् भ्यसं
भ्यम् युष्मदस्मद्भ्यां परो भ्यसं भवति शकारो मकारादित्वर्वाह्नस्यर्थः तेनात्वैत्वे न भवतः युष्मभ्यम् अ
स्मभ्यम् ङसिभ्यसोस्तः ङसिसाहचर्यात् पञ्चमीभ्यसग्रहणे त्वत् मत् युवाभ्याम् आवाभ्याम्
युष्मत् अस्मत् तवममङसा ङसासहितयोर्युष्मदस्मदोस्तवममौ भवतः तव मम युवयोः
आवयोः सामाकम् युष्मदस्मद्भ्यां परस्य सामआकं भवति युष्माकम् अस्माकम् त्वयि मयि
युवयोः आवयोः युष्मासु अस्मासु समस्यमानेप्येकत्ववाचिनी युष्मदस्मदी समासार्थोन्यसं
ख्येयेयुवावौ त्वन्मदावपि सिजसद्भ्यस्यपादशादेशाः स्युः सदैव ते त्वाहौ यूयवयौ तुभ्यमह्यौ
तवममावपि एतेपरत्वाद्बाधंतेयुवावौ विशेषके त्वन्मदावपिबाधंते पूर्वे विप्रतिषेधतः ३४

© Dharmartha Trust J&K. Digitized by eGangotri

सा
वे
८ 17

कसेभ्यः समासार्थो बह्वर्थे युष्मदस्मदौ तयोरेकत्वार्थत्वाद्युवावौ त्वन्मदौ न च त्वां मां वातिक्रां
तो तित्वम् अत्यहम् अतित्वाम् अतिमाम् अतियूयम् अतिवयम् अतित्वाम् अतिमाम् अतित्वान् अ
तिमान् अतित्वया अतिमया अतित्वाभ्याम् अतिमाभ्याम् अतित्वभ्यम् अतिमभ्यम् अतित्वत् अति
मत् अतितव अतिमम अतित्वयोः अतिमयोः अतित्वाकम् अतिमाकम् अतित्वयि अतिमयि
अतित्वयोः अतिमयोः अतित्वासु अतिमासु युवामावां वातिक्रांत इति विग्रहे सिजस्तु स्वभा
वत् अत्ययुवावां युष्मानस्मान्वातिक्रांत इति विग्रहे सिजस्तु स्वभावत् अतियुष्मान् अत्य
स्मान् अतियुष्मान् अत्यस्मान् अतियुष्मया अत्यस्मया युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थि
तयोर्वान्नावौ वस्नसौ युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयासहितयोर्यथासंख्येनामी आदेशा भवं
ति तत्रैकवचने तेमे भवतः द्विवचने वांनौ भवतः बहुवचने वस्नसौ त्वामामा इ समासहित
योर्युष्मदस्मदोस्त्वामापन्नौ भवतः धर्मो शृणु वः नः पातु दत्तात् ते मे पि शर्म सः स्वामी ते मे पि सहृ
त् पातु वाम् अपि नौ हरिः सर्वे वां नौ रदतात् ईशः पतिर्वाम् अपि नौ हरिः सो व्याद्वो नः शिवं वो नोद
द्यात् सेव्योत्र वः स नः अन्वादेशो नित्यम् अनन्वादेशे वा धातो ते त वेवा भक्तो नसे नेह स
येन सः नादौ वा कारौ पादादौ वर्तमानयोर्युष्मदस्मदोर्नैते एकाद्याते वाकाम् त्वाम्पातु मा
म्पातु वेदैरशेषैः संवेद्यो स्मान्कृष्णः सर्वदावतु विशेष्यपूर्वसंबोधनेनात्वमपूर्वसंबोधने च हि १२

© Dharmartha Trust J&K. Digitized by eGangotri

त्वात्समासत्वं बोधनात्संबोधनेनेते देवास्यास्यादिन्द्रहे हे विष्णोस्मात्तत्सर्वदा विशेष्यपूर्वो न हरे
कृपालो नः पाहि सर्वदा रक्ष देव नः वादिभिश्च च वा ह अह एव एवमभियोगेनैते आवयोश्च योश्च शो
हरिं मां मेव रक्ष तत्र च वा ह एव नानार्थेषात्वभियोगेनैते वेत सान्वीसमीतते भक्तस्तव रूपं ध्याय
ति वा ह एव तावेत भक्तस्त्वा पश्यति च ह एव विद्यमानपूर्वात्प्रथमांतात्स्मद्योरन्वादेशोन्वेते वा भ
क्तस्त्वमप्यहं तेन हरिस्त्वां त्रायते समाम् त्वामेति वा ॥ चादिर्निपातः ॥ च वा ह अह एव एवम् नूनम्
पृथक् शश्वत् युगपत् भूयस् नह हंत विना नाना स्वस्ति श्रत्ति दोषा नक्तम् मृषा मिथ्या अथ
अथो अहो उपसमम् उच्चैस् नीचैस् शनैस् सम्यक् सते प्रातर् दिवा रात्रौ सायम् चिरम् मनाक् ई
षत् जोषम् तूष्णीम् बहिस् अवस् अधस् समया निकषा अद्धा चेत् वत् सामि सना सनात् सनत्
तिरस् अंतरा अंतरेण सहसा अलम् वषट् नमः विहायसा अथ मिथो मिथस् प्रायस् मुहुस्
साधुस् साकम् समम् नमस् हिरुक् पृथक् मा माङ् स्वर् अंतर् प्रातर् पुनर् सनुतर् यावत् तावत्
स्वाहा स्वधा तथा हि खलु किल उष्ठ सष्ठ उपसर्गस्वरविभक्तिप्रतिरूपकाश्च अवदत्तम् अ
हंयुः हंतो अया इद उक पथे जेझै वाम प्रायाप्रकम् यथा कथा पाट् प्याट् अंग है हे भो अये
हंवविष्वद्रेश्वरे एकपदे ह्यक् सहसा अंत आत औषट् वौषट् इत्यादि तत्रादिविभक्त्यर्थे ति
पाठ्यते तस्मिन्निति तत्र अस्मिन्निति अत्र कुत्र कुत्र कस्मिन्काले तदा यदा कदा सदा सर्वदा

© Dharmartha Trust J&K. Digitized by eGangotri

सा
वं
१८

18

एकस्य अन्यस्य तेन प्रकारेण तथा सर्वथा कथम् इत्थम् अस्मादित्तिरतः ततः यतः कुतः सर्वतः बहु
तः सार्वविभक्तिकस्तसिरित्येके आदितः मध्यतः अंततः पूर्वस्मिन्निति पुरः पुरस्तात् अधस्तात् अ
धेः उपरि उपरिष्टात् परस्मिन्निति परेण दक्षिणेन दक्षिणात् दक्षिणतः उत्तरतः दक्षिणस्यां दिशि
दूरे दक्षिणाहि राज्ञाधीने राजसात् सर्वं भस्मेति भस्मसात् करीउरीउररी विस्तारांगीकारयोः सद्य
आदिकाले निपात्यते समाने ह्नि सद्यः अद्य अधुना इदानीं संप्रति साम्प्रतम् सम्प्रति कुरिति कु
त्सिते न्यक्षीमः आश्चर्ये चित्रम् पूर्वेद्युः परेद्युः परेद्यवि परश्वः परुत् परारि अन्येद्युः तर्हि यर्हि कर्हि
एतर्हि प्रादिरुपसर्गाः अपपराः अपसम् अनु अव निस् निर् दुस् दुर् वि अभि अति अपि सु उत् नि प्रति परि
अपि प्रति उप आङ् ऊर्यन् अंतर् आविर् ॥ आप्यायनोः ॥ उपसर्गो धातोः प्राक् प्रयोक्तव्याः तदव्ययम् अव्य
व्ययसंज्ञं भवति क्त्वा यं तेन च क्त्वा कपूनमणम् यथाशमवत् दृक्तवसुश्चामहत्यायेतमव्ययसंज्ञं भ
वति अव्ययादिभक्तेर्लुक् तत्र शब्दनिर्देशो सदृशं त्रिषु लिंगेषु सर्वासु च विभक्तिषु वचनेषु च स
र्वेषु यन्न व्येति तदव्ययम् वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः आपं चैव हलंतानां यथा वाचा
निशा दिशा ॥ वतंसः अवतंसः अपिधानम् पिधानम् इत्यव्ययानि आवतः स्त्रियाम् अकारांतात्रा
तः स्त्रियां वर्तमानात् टाप् प्रत्ययो भवति सर्वा माया मेधा अजादेश्च अजा एडका अश्वा चटका मूषि
का बाला वत्सा होढा मन्दा विलाता संफला भस्त्रफला अजिनफला शणफला पिंडफला स १८

© Dharmartha Trust J&K. Digitized by eGangotri

स्था शाकस्था समकस्था कोष्ठस्थाशोनस्थापकस्था मूष ज्ञस्वा उक्षिद्वादेववि
शात्वे ह्वाकनिह्वामथ्यमेति पुंयोगेपि कोकिला नालावपि अमला इत्यादि ॥ पादोवाईप ॥ हि
पो हिपात् काप्यतः कापिपरे एवं व्याकारस्येकारो भवति कारिका पाचिका अतः किम्
नौका लिपकादीनांच लिपका फचका चटका पकासकाअपत्यका अपित्यका ॥ तारका
ज्योतिषि अस्य अत्वारिका वर्णकातांतवे अमचवर्णिका वर्तका शाकुनौशाचाम् उदीचां वर्ति
का अष्टका आद्य अष्टिका माक्कविद्या सूतका सूतिका पुत्रिका पुत्रका वृन्दारका वृन्दारिका
आर्यका आर्यिका चटकका चटकिका निर्भस्तका निर्भस्तिका पषका पषिका अजका अ
जिका लका लिका द्वके द्विके निःस्वका निःस्विका ॥ रुस्वोवा ॥ स्त्रियां पूर्वस्य कापि परे तस्य वा
दौ ह्रस्वो वा स्यात् गंगका गंगाका गंगिका नदिका नदीका ओषधिका ओषधीका
वा ग्रहणादेव संज्ञानाममात्र गोका नौका ॥ व्रणाईप् दीदिवी अस्ती मघोनी कृती यस्य लोपः
इवर्णावर्णयोर्लोपो भवति नदिन यवस्वयोरोपि च औपगवी पैरी ईयतो लोपः राज्ञी हि
राज्ञी श्विनः षकारटकारउकारऋकारान्तं वंधात् स्त्रियामीप् भवति षवगको ट ऋ तचरी
इत्वरी कुरुदक्षी कुरुह्वयसी कुरुदक्षी कुरुमाची ॥उ॥ गोमती अप पचंती विदुषी श्रेयसी तदती
वारोपः शानः तदंती मवंताञ्चेप् सीमा सोमानो अलंताद्रत्रवीत्वे वहुयज्वा वहुयज्वानौ अ

© Dharmartha Trust J&K. Digitized by eGangotri

सा
चं
३९

19

पवा सीमा सीमे सीमाः दामा दामे दामाः बहुयज्वा बहुयज्वे बहुयज्वाः उपधालोपिनो वेप् बहु
राज्ञी बहुराज्ञ्यौ बहुराज्ञ्यः बहुराजा बहुराजानौ नरादेः अदंतात्स्त्रियामीप् नदी गौरी सौपर्णी
श्रातिकी चौरी सैरणी पौत्री यानकी कौयाष्टी कौमारी गार्गी गारुपौयणीत्यादि अनेकस्वरयोवाचि
नोऽदंतात्स्त्रियामीप् कुमारी किशोरी वधूटी चिरण्टी तरुणी तलुनी अनंत्येति किम् वृद्धा स्थवि
रा अदंतात्किम् शिशुः ऋयोनेकस्वरवर्णादेर्नञ्स्त्रियाम् कंजभी अदभी वयोवाचिनो हायन
सेप् द्विवत्सर्याणवम् द्विहायणी चतुर्हायणी इंद्रादेरानीप् स्त्रियां पुंयोगे इंद्राणी भवानी श
र्वाणी रुद्राणी वरुणानी मृडानी आचार्यादणत्वं च आचार्याणी हिमारण्ययोर्महत्त्वे महद्धि नृ०
मं हिमानी अरण्यानी यवाद्दोषे दुष्टो यवो यवानी यवनाल्लिप्याम् यवनानी मातुलोपाध्या
याभ्यां वा मातुलानी मातुली उपाध्यायानी उपाध्यायी अर्यक्षत्रियोपाध्यायेभ्यो वा स्वार्थे अ
र्याणी अर्या क्षत्रियाणी क्षत्रिया उपाध्यायानी उपाध्याया पुंयोगात् अदंतात्स्त्रियामीप् पु
रोगणकी पालकांतान्न गोपालिका अश्वपालिका सूर्याद्देवतायामाप् सूर्यस्य स्त्री देवता
सूर्या अमासूरी जातेरयोपधात् जातिवाचिनो यकारोपधाददंतात्स्त्रियामीप् ब्राह्मणी
वृषली यकारोपधात्तु क्षत्रिया वैश्या क्वचिन्न बलाका गवयहयमुकयमनुष्यमत्स्याना
मनिषेधः गवयी हयी मुकयी हलस्तद्धितस्येति यलोपः मनुषी सूर्यागस्त्ययोरीपि सूरीअ ३९

© Dharmartha Trust J&K. Digitized by eGangotri

गस्ती तिष्यपुष्ययोर्नक्षत्राणि यलोपः तैषी पौषी ईयस्मत्स्यस्य यलोपः मत्सी पात्रे कुण्डी कुण्डा
न्या गोणी आवपने गोणा अन्या स्थली अकृत्रिमायाम् भाजी श्राणा चेत् नागी स्थूला चेत् काली
वर्णश्चेत् नीली औषधिः प्राणि च संज्ञायां वा कुशी अयोविकारश्चेत् कामुकी मैथुनेच्छायाम् कब
री केशविन्यासे शोणाद्वा शोणी शोणा बह्वादेर्वा नोनिपूर्वपदात् ज्ञानात् ऊरुभत्री ना
तोन्तात्र इत्यजाला अस्वाङ्गपूर्वपदाद्वा सुरापीती पाणिगृहीती भार्यायाम् अन्या पाणिगृही
ता क्रीतात् करणादेः वस्त्रक्रीती क्वचिन्न धनक्रीता क्तादल्पाख्यायाम् अभ्रलिप्ती द्योः अल्पत्वे कि
म् चन्दनलिप्ता अन्या स्वाङ्गाद्वा स्वाङ्गवाचिनोऽन्तादसंयोगोपधाद्वा स्त्रियामीप् समुखी समुखा
सकेशी सकेशा नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाद्वा तुङ्गनासिकी तुङ्गनासिका तलोदरी
